**दिनाङ्क :- 16.03.2026**
**प्रात: - 06:55**

## अथ वार्ता:

-

### भारत-निर्वाचनायोग:

भारत-निर्वाचनायोगेन असम-केरल-पुद्दुचेरी-तमिलनाडु-पश्चिम-बंगाल-राज्येषुविधानसभा निर्वाचनस्य घोषणा कृता।
गतदिने नवदेहल्यां मुख्य-निर्वाचनायुक्त: ज्ञानेश कुमार: घोषणां कुर्वन् विज्ञापितवान् यत् असम-केरल- पुद्दुचेरी-राज्येषु एकचरणात्मकाय निर्वाचनाय एप्रिलमासस्य नवमे दिनांके मतदानं भविष्यति। तमिलनाडु –राज्ये एक चरणात्मकाय निर्वाचनाय मतदानं एप्रिलमासस्य त्रयोविंशे दिनांके विद्यास्यते। पश्चिमबंगाल प्रदेशे द्विचरणात्मकाय निर्वाचनाय एप्रिलमासस्य त्रयोविंशे अथ ऊनंत्रिंशत् दिनांके मतदानं भविष्यति।

एतेषु चतुर्षु राज्येषु केन्द्रशासितप्रदेशे च मतगणना में मासस्य चतुर्थे दिनांके भविष्यति।

असम-केरल-पुद्दुचेरी-राज्येषु विधानसभा निर्वाचनाय अधिसूचना अद्य प्रकाशयेत्। चतुर्षु राज्येषु केन्द्रशासित प्रदेशे च आदर्श-आचार-संहिता तत्काल प्रभावेण प्रवर्तिता।

### उपनिर्वाचनं

निर्वाचनायोगेन देशे अष्ट-आसन्देषु उपनिर्वाचनस्य घोषणा अपि विहिता। षट् राज्येषु विधानसभाआसन्देभ्य: उपनिर्वाचनं विधास्यते। मुख्य-निर्वाचनायुक्त: प्रकाशितवान् यत् गोवा-कर्णाटक-नागालैंड-त्रिपुरा-राज्येषु उपनिर्वाचनाय अधिसूचना अद्य प्रकाशयेत्। एतेषु आसेन्देषु उपनिर्वाचनाय मतदानम् एप्रिलमासस्य नवमे दिनांके भविष्यति।

### लोकसभा

लोकसभायाम् अद्य रेल-मन्त्रालयस्य नियन्त्रणे अग्रिमवित्तवर्षाय अनुदानपत्रेषु चर्चा मतदानं च भवेत्। एतदतिरिच्य कृषि-कृषक-कल्याण-मन्त्रालयस्यनियन्त्रणे अनुदान-पत्रेषु चर्चा अद्य सम्मिलिता वर्तते। राज्यसभायां संसद् द्वारा विनियोग-विधेयके विचार-विमर्श: कुर्यात्।

### विदेशमन्त्री

विदेश-मन्त्री डॉ. सुब्रह्मण्यम-जयशंकर: यूरोपीय-संघस्य स्वीय-समकक्षै: सह परामर्शाय बेल्जियमदेशस्य राजधानीं ब्रुसेल्स इत्यत्र सम्प्राप्त:। द्विदिवसीय यात्रान्तर्गतं डॉ. जयशंकर विदेशप्रकरणानां परिषद: उपवेशने यूरोपीय संघस्य विंशति:सदस्यदेशानां विदेश-मन्त्रिभि: समं सम्वादं विधास्यति। विदेश-मन्त्रालयेन विज्ञापितं यत् डॉ. जयशंकर: यूरोपीय- संघस्य नेतृत्वेण सह अथ बेल्जियमस्वीय समकक्षै: सह उपवेशनं करिष्यति।

### दोहा दूतावास

दोहा-स्थितेन भारतीय-दूतावासेन समुद्रघोषितं यत् कतर-एयरवेज-समवायेन अग्रिम-द्विदिवसयो: भारताय त्रीणि-यात्राक्रमाणि संचालयिष्यन्ते यच्च् नवदेहली-मुम्बई-कोच्चि-इति स्थानानि संयोजयिष्यति।

### तेलंगाना विधानसभा

तेलंगाना-विधानसभाया: आय-व्यय-पत्रक-सत्रम् अद्य प्रभृति समारभेत्। व्यवस्थासु – आवास-सुरक्षा-उपायेषु चर्चाकरणाय गतदिने विधानसभा-भवन-परिसरे उपवेशनं समायोजितम्। अध्यक्ष: गद्डाम-प्रसाद कुमार: विधानसभापरिषद्: अध्यक्ष: गुट्टा-सुखेन्द्र रेड्डी च उपवेशनस्य अध्यक्षतां कृतवन्तौ ।

**मुष्टामुष्टि-क्रीडा**

मुष्टामुष्टि-क्रीडायां भारतेन गतदिने बैंकॉक-इत्यत्र समायोजित विश्व –बॉक्सिंग विश्व-चषक-प्रतियोगितायां स्वर्णपदकमेकं, त्रिरजतपदकं, कांस्यपदमेकं च विजित्य स्वीयाभियानं सम्पूरितम्। युव-ओलंपिक-भार-वर्गेषु पुरूष-महिला-दलै: उत्कृष्टं प्रदर्शनं कृतम्।

**।। इति वार्ता:।।**